SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:11, Issue: 12
March 2025, Price Rs.20/-
No. of pages-24

तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

मार्च् - २०२५ रू.२०/-



## तिरुमलस्थ श्रीवेङ्कटेश्वरस्वामिनः युगादि आस्थानम्

30.03.2025



04-02-2025 तिथौ रथसप्तमीसन्दर्भे
पुरस्कृत्य प्रवर्तित सप्तवाहनानां दृश्मालिका।



2025 वर्षे जनवरि, फिब्रवरि मासयोः प्रवर्तित उत्तरप्रदेश् प्रयागराज् महाकुम्भमेलासन्दर्भे पुरस्कृत्य ति.ति.देवस्थानेन श्रीवेङ्कटेश्वर देवालयाकृतिः निर्मिता। तत्र उत्सवविग्रहाय कृतपूजाकैङ्कर्यदृश्यमालिका। अस्मिन् सन्दर्भे ति.ति.देवस्थान धर्मकर्तुमण्डल्यध्यक्षाः बि.आर्. नायुडु महोदयाः पत्नी सहितः, अन्येच भागं गृहीतवन्तः।



## गीतामृतम्

श्रीभगवानुवाच -

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।
योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्द्योः समो भूत्वा समत्वं योग उच्यते।।

(भगवद्गीता २.४७-४८)

हे अर्जुन! तव कर्मणि एव अधिकारः। कदापि कर्मफलासक्तिः मास्तु कर्मफलानां हेतुभूतः मास्तु। सकाम भावनया कर्माणि नाचरणीयानि। कर्मणां अकरणेऽपि तव आसक्तिः मास्तु। निष्कामानुष्ठानादेव अन्तःकरणशुद्धिः स्यात् तदनुष्ठानं ब्रह्मज्ञानानुकूलं स्यात्। ब्रह्मज्ञानात् दैवानुकूल्यं सिद्ध्यति।

हे अर्जुन! प्राप्ताप्राप्तकर्मानुष्ठानफलसम्पद्भावाभावे समबुद्धिः योगः इत्युच्यते। अतः कर्मफलासक्तिं परित्यज योगनिष्ठायुतः कर्माण्याचर।

धर्मकार्याचरणशीलाः चतुर्विधाः भवन्ति। फलाकांक्षी प्रतिष्टाकांक्षी निर्विघ्नकार्यसमाप्त्याकांक्षी, फलाभावेऽपि सुखदुःखहीनद्वन्दातीतजीवन्मुक्त भावस्थितः इति। एतेषु चतुर्थः सत्त्वरजस्तमोगणातीतः उत्तमोत्तमः इति परिगण्यते।

## सङ्कीर्तनम्



जय जय नृसिंह सर्वेश
भयहर वीरप्रह्लाद वरद
मिहिर शशिनयन मृगनखेश
बहिरन्तःस्थपरिपूर्ण
अहिनायक सिंहासनराज
बहुलगुणगणप्रह्लादवरद
चटुल पराक्रमसम, घनविरहित
निटलनेत्रमौनिप्रणुत
कुटिलदैत्यततिकुक्षिविदारण
पटुवज्रनख प्रह्लादवरद
श्रीवनितासंश्रितनामाङ्क
भावजकोटिप्रतिमान
श्रीवेङ्कटगिरिशिखरनिवास
पावनचरित प्रह्लादवरद

(अन्नमाचार्य आध्यात्मक सङ्कीर्तना)



# श्रीमहालक्ष्म्याविर्भावविशिष्टफाल्गुणमास वैशिष्ट्यम्

मासानां गणनमनुसृत्य भारतीयकालगमने वर्षे अन्तिममासः फाल्गुणमासः। विज्ञानदृष्ट्यापि परिशीलनात् अन्तिमशिशिरर्तुयुतान्तिममासः। वृक्षेभ्यः फलितशुष्कपत्राणामधःपतनमस्मिन्नेव काले एव प्रवर्तते। आगामिनूतनवर्षवसन्तागमने नवपल्लवाविर्भावसंसिद्धिसूचकसङ्केतः अयं मासः।

अस्मिन्मासे बहूनि पुण्यव्रतानि, पूजाश्च आचरणीयाः इति शास्त्रं, निर्दिशति। अस्मिन्मासे प्रारभ्यमानेषु बहुषु, कर्मसु गृहनिर्माणादिकार्यारम्भात् सन्तानप्राप्तिसुवर्णप्रात्प्यादयः लभ्यन्ते इति मात्स्यपुराणवचनम्।

प्रधानतया उत्तरफल्गुणीनक्षत्रसहित पूर्णिमातिथिरागछति। अतएव मासस्यास्य फाल्गुणीमासः इति नामागतमिति वदन्ति। अस्मिन्मासे एव सम्पन्मातुः श्रीमहालक्ष्म्याः आविर्भावः जातः। अस्मिन्दिने लक्ष्मीदेवीं विशिष्य अर्चयित्वा मातुः तस्याः करुणाकटाक्षवीक्षण भाग्यमवश्यं प्राप्तव्यम् अस्यां पौर्णमीतिथावेव राक्षसपीडापरिहारार्थं होलिकापूर्णिमा निर्वाह्यते। श्रीमहाविष्णोः नन्दकांशसम्भूतः अन्नमाचार्यः श्रीवेङ्कटेश्वरस्वामिनं कीर्तयन् द्वयधिकत्रिंशत्सहस्रसङ्कीर्तनानि विरचय्य बहुलद्वादशी दिने नन्दके अस्मिन्मासे एव विलीनः। अस्मिन्मासे एव तस्य वर्धन्तिनिर्वहणोत्सवः सम्प्रदायः। तिरुमलक्षेत्रे स्वामिनः वर्षे वर्षे पञ्चदिनपर्यन्तं प्लवोत्सवः नयनानन्दकरः। प्रथमदिनद्वये त्रेताद्वापरयुगजात श्रीरामकृष्णत्वेन श्रीवेङ्कटेश्वरस्वामी भक्तेभ्यः प्लवेस्वदर्शनं ददाति। शिष्टदिनत्रये कलियुगस्वामी श्रीनिवासः मुग्धमनोहररूपे जगज्जेगीयमानतया प्लवविहारं कुर्वन् भक्ताननुगृह्णाति। एवमेव तिरुमल पर्वतसानुषु ‘‘कुमारधारा तीर्थत्रिकोटिः विशिष्य प्रवर्तते। अस्मिन्मासान्ते फाल्गुणामावास्यानन्तरं श्रीपतिसन्निधौ चैत्रशुद्ध प्रतिपत्तितिथौ आन्ध्राणां पर्व इति विश्वावसुनामसंवत्सर - युगाद्यास्थानं अङ्गरङ्गवैभवोपेतया प्रवर्तते। श्रीवेङ्कटेश्वरस्वामिनः आशीभिः समस्तमानवाळिः आयुरारोग्यैश्वर्यैः अभिवृद्धिं प्राप्नोतु इत्याशास्महे।

ओं नमो वेङ्कटेशाय


अग्निदाहादपि विशिष्टं वाक्पारुष्यम्।

# मार्च् -२०२५

सम्पुटिः-११ सञ्चिका-१२

स्वस्तिश्री चान्द्रमानश्रीक्रोधिनामसंवत्सर फाल्गुणशुद्धद्वितीयतिथि शनिवारादारभ्य - श्रीविश्वावसु नाम संवत्सर चैत्रशुद्धद्वितीयतिथि सोमवारपर्यन्तम् - २०२४



| | |
|---|---|
| लक्ष्मीजयन्ति | 06 |
| - डा पि.माधवी | |
| कुलशेखराल्वारु वैभवम् | 09 |
| - आचार्य जि.पद्मनाभम् | |
| तिरुमलेशस्य युगादि आस्थानम् | 11 |
| - डा एम्.ईश्वरम्म | |
| श्रीशेषाद्रीशस्तुतिः | 15 |
| - श्री कन्दाल लक्ष्मीनारायणः | |
| मत्स्यजयन्ति | 17 |
| - डा के.कोटेश्वरय्य | |
| बलवतोऽपिगर्वः विनश्यति (हनुमद्गर्वभङ्गः) | 19 |
| - डा सि.रामलक्ष्मी | |
| भक्त्या असाध्यं किमपि नास्ति (चित्रकथा) | 20 |
| - डा.के.सूर्यनारायणरेड्डि | |
| बालविनोदिनी | 22 |


मुखचित्रम् - तिरुमलस्थ श्रीस्वामिनः युगादि आस्थानम्।

अन्तिमपुटः- श्रीलक्ष्मीजयन्ति।


## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
सम्पादकः,
०८७७ - २२६४३६०

सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -

sapthagiri.helpdesk@tirumala.org



एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-


*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका






गौरवसम्पादकः-

श्री जे.श्यामला राव, I.A.S.,

कार्यनिर्वहणाधिकारी

ति.ति.देवस्थानानि

प्रकाशकः - प्रधानसम्पादकः
डा॥के.राधारमणः,
M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga

सम्पादकः -

डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः - श्री पि.रामराजु, M.A.,

प्रत्येकाधिकारी,

ति.ति.दे.मुद्रणालयः,

तिरुपतिः।

मुख्यछायाचित्रग्रहणम् - श्री पि.एन्.शेखरः,

छायाचित्रग्राहकः, ति.ति.दे.

श्री बि.वेङ्कटरमणः,

सहायक-छायाचित्रग्राहकः, ति.ति.दे.



सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
*– प्रधानसम्पादकः*


वृक्षछेदकः असिपत्र नरके पतति शुनी। दशपुत्र समोद्रुमः।

# लक्ष्मीजयन्ति

- डा.पि.माधवी, चरवाणी - ८५१९८०४७८४



हिन्दूमतप्रधानदेवतासु, लक्ष्मीः त्रिमूर्तिषु विष्णोः पत्नी। इयं धनसम्पच्छान्तिश्रेयोऽदृष्टणां आधिदेवतात्वेन परिगण्यते। भारतदेशे दीपावळीपर्वदिने इमां विशिष्य पूजयन्ति। अमूल्याभरणैः महासौन्दर्यवतीयं चतुर्भुजैर्विराजते। द्विहस्ताभ्यां पुष्पाणि, अन्यद्विहस्ताभ्यां स्वर्णनाणकानि ददद्दृश्यते। इयं पद्मासना पार्श्वे गजाभ्यां सहिता संप्रकाशते। विष्णोः पत्नी लक्ष्मीव रामस्य पत्नी, सीतेव, कृष्णस्य पत्नी रुक्मिणीव वेङ्कटेश्वरस्य पत्नी पद्मावतीव त्रेताद्वापरकलियुगेषु अवतीर्य संदृश्यते।

महालक्ष्मीमिमां वर्षे वर्षे श्रावणमासे द्वितीय शुक्रवासरे वरलक्ष्मीव्रतमाचरन्त्यः स्त्रियः लक्ष्मीं विशिष्टपूजाभिराराधयन्ति। दीपावळीनवरात्रिसन्दर्भे लक्ष्मीपूजायाः अतीव प्रामुख्यं पश्यामः। मानवाळेः अष्टलक्ष्याणि आवश्यकानि। तदनुगुणतया अष्टलक्ष्म्यवताराः वर्तन्ते। लक्ष्मी नाम लक्ष्यमार्गे नयद्देवता। लक्ष्यसिद्धिपर्यन्तं सेवया लक्ष्म्याः अनुग्रहं अवश्यं प्रप्स्यन्ति।



### अष्टलक्ष्म्यः

१. **आदिलक्ष्मीः** - महालक्ष्मीयं हस्तचतुष्टयेषु एकेन पद्मं द्वितीयेन पताकां बिभ्रती अन्यहस्तद्वयेन वरदमुद्राविशिष्टा भाति।

२. **धान्यलक्ष्मीः** - अष्टभुजैः पीतवस्त्रैरलङ्कृता प्रकाशते। द्वाभ्यां हस्ताभ्यां पद्मानि! एकेन हस्तेन गदा, हस्तत्रयेण शालिधान्यं इक्षुखण्डं, रम्भाफलावळिं द्वाभ्यां हस्ताभ्यां वरदाभयमुद्राभ्यां सहिता प्रकाशते।



३.**धैर्यलक्ष्मीः** - वीरलक्ष्मीव व्यवह्रियमाणेयं रक्तवस्त्रधारिणी वर्तते। शङ्खचक्र धनुर्बाणत्रिशूलैः, हस्तद्वये वरदाभयमुद्राभ्यां शोभते।

४.**गजलक्ष्मीः** - राज्यप्रदात्री भुजचतुष्टयविशिष्टामूर्तिरियं पार्श्वे गजाभ्यां अभिषिच्यमाना रक्तवस्त्रधारिणी सती हस्तद्वये पद्मालङ्कृता, अन्यहस्तद्वयेन वरदाभयमुद्राभ्यां, विराजते।

५. **सन्तानलक्ष्मीः** - षट्हस्तविशिष्टा कलशखड्गधारिणी वर्तते। अङ्के शिशुं एकेन हस्तेन अभयमुद्रां दर्शयन्ती दृश्यते। पद्महस्तेन शिशुं एकेन हस्तेन, भ्रियमाना वर्तते।

६. **विजयलक्ष्मीः** - अष्टभुजैः रक्तवस्त्र शङ्खचक्रखड्गपाश -धारिणी हस्तद्वयवरदाभययुक्ता देदीप्यते।



७. **विद्यालक्ष्मीः** - विद्यामाता शारदा वीणाहस्तधारिणी प्रकाशते।

८. **धनलक्ष्मीः** - हस्तषट्कयुता रक्तवस्त्र शङ्खचक्रकलश धनुर्बाणपद्मधारिणी अभयमुद्रया हस्ताभ्यां स्वर्णनाणकवर्षदायिनीव राराजते।

### अष्टलक्ष्मीस्तोत्रम्

**आदिलक्ष्मीः -**

१. सुमानसवन्दितसुन्दरिमाधवि, चन्द्रसहोदरि हेममये
मुनिगणवन्दितमोक्षप्रदायिनि, मञ्जुलभाषिणि वेदनुते।
पङ्कजवासिनि, देवसुपूजित सद्गुणवर्षिणि शान्तियुते
जय जय हे, मधुसूदनकामिनि, आदिलक्ष्मि परिपालय, मां।।



कूटपण्यस्य विक्रेता दण्ड्यश्चोखत्सदा।

२.धान्यलक्ष्मीः- अयिकलिकल्मषनाशिनि, कामिनि, वैदिकरूपिणि वेदमये क्षीरसमुद्भवमङ्गलरूपिणि, मन्त्रनिवासिनि मन्त्रनुते। मङ्गलदायिनि अम्बुजवासिनि,देवगणाश्रितपादयुते,जय जय हे- मधुसूदनकामिनि, धान्यलक्ष्मि परिपालय माम्

३. धैर्यलक्ष्मीः - जयवर वर्षिणि वैष्णवि भार्गवि मस्त्रस्वरूपिणि मन्त्रमये
सुरगणपूजित शीघ्र फलप्रद ज्ञानविकासिनि, शास्त्रनुते
भवभयहारिणि पापविमोचनि, साधुजनाश्रित पादयुते,
जय जय हे मधुसूदन कामिनि धैर्यलक्ष्मि परिपालय माम्।

४. गजलक्ष्मीः -
जय जय दुर्गति नाशिनि कामिनि सर्वफलप्रदशास्त्रमये
रथगजतुरगपदातिसमावृतपरिजनमण्डितलोकनुते।
हरिहरब्रह्मसुपूजित सेविततापनिवारिणि पादयुते जय जय हे
मधुसूदनकामिनि, गजलक्ष्मीरूपेण पालय माम्।।

५.सन्तानलक्ष्मीः -
अयिखगवासिनि, मोहिनि चक्रिणि रागविवर्धिनि ज्ञानमये
गुणगणवारिधि लोकहितैषिणि, सप्तस्वरभूषितगाननुते।
सकलसुरासुरदेवमुनीश्वरमानववन्दित पादयुते
जय जय हे मधुसूदनकामिनि, सन्तानलक्ष्मि परिपालय माम्।।

६. विजयलक्ष्मीः -
जय कमलवासिनि, सद्गतिदायिनि ज्ञानविकासिनि गानमये
अनुदिनमर्पितकुङ्कुमधूसरभूषितवासितवाद्यनुते।
कनकधरास्तुतिवैभववन्दित शङ्करदेशिकमान्यप्रदे
जय जय हे मधुसूदनकामिनि विजयलक्ष्मि, परिपालय माम्।।

७. विद्यालक्ष्मीः -
प्रणतसुरेश्वरि भारति भार्गवि शोकविनाशिनि रत्नमये
मणिमयभूषितकर्णविभूषणशान्तिसमावृतहास्यमुखे।
नवनिधिदायिनि, कलिमलहारिणि कामितफलप्रदहस्तयुते
जय जय हे मधुसूदनकामिनि विद्यालक्ष्मि सदा पालयमाम्।।

८. धनलक्ष्मीः -
धिमिधिमि, धिन्धिमि, धिन्धिमि धिन्धिमि
दुन्दुभिनादसुपूर्णमये, धुमधुम,
धुंधुम धंधुम धुंधुम शङ्खविनादसुवाद्यनुते।
वेदपुराणेतिहाससवैदिकमार्गप्रदर्शयुते
जय जय हे मधुमूदन कामिनि धनलक्ष्मीरूपेण पालय माम्।।

अस्मिन् वर्षे, मार्चूमासे १४ दिनाङ्के लक्ष्मीजन्मदिनं पुरस्कृत्य लक्ष्मीजयन्ति उत्सवं निर्वहिष्यन्ति। भक्ताः लक्ष्मीहोममाचरन्तः जन्मनक्षत्रे सहस्रलक्ष्मीनामस्तोत्रपारायणं करिष्यन्ति। वेदेषु महाभागवतविष्णुपुराणमहाभारतग्रन्थेषु समुद्रमन्थनवृत्तान्तः वर्णितः।









**समुद्रमन्थनकथा -** दुर्वासमहर्षिः शिवात्प्राप्तं पुष्पमालां देवेन्द्राय गौरवपुरस्कारतया ददौ। सः देवेन्द्रः तां मालां स्ववाहनगजशिरसि अलञ्चकार। सः गजः तां मालामपनीय पादाहताञ्चकार। लक्ष्मीपादपद्मतुल्यां तां तथा गजपादमर्दितां दृष्ट्वा कोपोद्रिक्तः दुर्वासमुनिः इन्द्रं तव, दैवसर्वसम्पदः विनशिष्यन्तीति शशाप।तत्फलतया राक्षसाः स्वर्गमाक्रम्य देवान् सर्वान् पराजितान् चक्रुः। ततः विष्णूपदेशात् राक्षसैः मित्रत्वं प्राप्य अमृतप्राप्तये समुद्रमथनप्रयत्नं राक्षसैः सह चक्रुः। मन्दरपर्वतं मन्थनं कृत्वा सर्पनायकं, शिवकण्ठभरणं वासुकिं रज्जुं कृत्वा मन्थनकार्यं प्रारेभिरे। पर्वते समुद्रे पतिते विष्णुः कूर्मरूपं धृत्वा मन्दरपर्वतमुद्धारयामास। तदा अमूल्यरत्नानि समुद्रात् उद्धृतन्यासन्। तानि कौस्तुभादीनि विष्णुः स्वीचकार। पश्चात् हालाहालविषे उद्भूते लोकप्राणिरक्षणार्थं शिवः तं विषं स्वीकृत्य कण्ठगतञ्चकार। पश्चात् अप्परसः, शुभप्रदा लक्ष्मीदेवी च उद्भूताः। उद्भूतां तां लक्ष्मीदेवीं विष्णुः स्वधर्मपत्नीत्वेन स्वीचकार। अयमेव लक्ष्मीजन्मवृत्तान्तः। पूर्णिमातिथिः १३. २०२५ - आरभ्य घण्टासु १०.३५ पूर्णिमा तिथिः १२-२३ घण्टासु मध्याह्ने अन्तंगछति। अस्मिन्नेव समये वित्तलक्ष्मीपूजां भाक्ताः आचरन्ति।

१. लक्ष्मीजयन्ति सन्दर्भे लक्ष्मीदेवालयं गत्वा लक्ष्मीप्रार्थनाः कर्तव्याः। देवालये असन्निहिते सति गृहे एव प्रातः पद्मपत्रैः फलैः धूपैः लक्ष्मीपूजा कर्तव्या।

२. लक्ष्मीयन्त्रे दृष्टिं निधाय लक्ष्मीध्यानं कर्तव्यम्।

३. लक्ष्मीध्याने ओं ह्रीं श्रीं लक्ष्मीदेव्यै नमः इति मन्त्रपारायणं कर्तव्यम्। लक्ष्मीमन्त्रं पद्मपत्रेष्वपि दृष्टिं निधाय जपेयुः।

४. युक्तब्राह्मणानाहूय गृहे लक्ष्मीपूजा कृताचेत् महत्फलं दास्यति।

अत्र कलशस्थापनम्। पञ्चाग्रस्थपनम् (गौरी गणेश पुण्यवाचन, षोडशमन्त्रिक नवग्रह सर्वतोभद्र) ६४ योगिनी पूजा क्षेत्रपालपूजा, स्वस्तिवचनम् सङ्कल्प, गणेशपूजा अभिषेकः, नवग्रह पूजा १०८ पर्याय मन्त्रजपः, प्रधानदेवताह्वानं लक्ष्मीविग्रहपूजाभिषेकः, लक्ष्मीसूक्त, स्तोत्रमन्त्र, कनकधारा स्तोत्रपारायणम् हारति-होम-पुष्पाञ्जलयः विधेयाः। सप्तरुद्राक्षमाला धर्तव्या। रुद्राक्षमालाधारणात् अन्तश्शुद्धिः इच्छापूरण शक्तिः, आर्थिकाभिवृद्धिः भवेदिति लक्ष्मीवचनम्।

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं। दासीभूत समस्तदेववनितां लोकैकदीपाङ्कुरां।
श्रीमन्मकन्दाटाक्षलब्धविभव ब्रह्मेन्द्रगङ्गाधरां। त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे जगन्मातरम्।

२. सिद्धिलक्ष्मीर्मोक्षलक्ष्मीस्सरस्वती।
श्रीर्लक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा।
३. वराङ्कुशौ पारामभीतिमुद्रां करैर्वहन्तीं कमलासनस्थां
बालार्ककोटिप्रतिभां त्रिनेत्रां।
भजेहमाद्यां जगदीश्वरीं त्वाम्।।
४. आं विष्णुपत्नीं क्षमांदेवीं माधवीं माधवप्रियाम्।
विष्णोः प्रियसखीं देवीं नमाम्यच्युतवल्लभाम्।।

**महालक्ष्म्यष्टकम् -**

१. नमस्तेस्तु महामाये श्रीपीठे सुरपूजिते
शङ्खचक्रगदाहस्ते महालक्ष्मी नमोऽस्तु ते।
२. नमस्ते गरुडारूढे कोलासुरभयङ्करि।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते।।
३. सर्वज्ञे! सववरदे सर्वदुष्टभयङ्करि।
सर्वदुःख हरे देवि! महालक्ष्मि नमोऽस्तु ते।
४. सिद्धि बुद्धिप्रदेदेवि! भुक्तिमुक्तिप्रदाधिनि।
मन्त्रपूते सदा देवि महालक्ष्मि नमोऽस्त ते।।
५. आद्यन्तरहिते देवि! आद्यशक्ति! महेश्वरि।
योगजे योगसम्भूते! महालक्ष्मि नमोऽस्तुते।।
६. स्थलसूक्ष्ममहारौद्रे, महाशक्ति महोदरे।
महापापहरे देवि! महालक्ष्मि नमोऽस्तुते।।
७. पद्मासनस्थे देवि! परब्रह्मस्वरूपिणि।
परमेशि जगन्मातः, महालक्ष्मि नमोऽस्तुते।।
८. श्वेतम्बरधरे देवि! नानालङ्करभूषिते।
जगत्स्थले जगन्मातः। महालक्ष्मि नमोऽस्तुते।।

जन्मवृत्तान्ते अमृतोत्पत्तै सागरमथने लक्ष्मीकथांशे अनेकदिव्य सन्देशाः वर्तन्ते बहुजनहिताय स्वल्पाभिप्रायभेदान् विस्मृत्य सर्वैः संघीभावेन शत्रुभिरपि आवश्यके प्राप्ते मित्रत्वं कृत्वा महत्कार्यसाधनाय संसिद्धैः भाव्यामित्युपदेशः एकः। साध्यस्य महत्तरत्वात् प्रयत्नः महत्तमः भाव्यः। एवं कृतप्रयत्नेषु सत्फलितानि दुष्कलितानि च सम्भवेयुः। अतः सागरमथनेन उत्पन्नः प्रथमं हालाहलः। दुष्फलितात् अपि अविरतै भयोत्पत-सृष्टेरपि निर्भयतया संघीभावोन्मुखैः क्लिष्टपरिस्थितिष्वपि ऐकमत्यमत्या भाव्यम्। अतः अनेकदेवतासु शिवः एक एवक्लेशान् सहन् क्षमया लोकक्षेमाय पुरोगामी हालाहलं, पपौ। ततः अभ्युदयसूचिका लक्ष्मीः आविर्भूता। देवदानवयोः द्वेषोद्भवे सति विष्णुः सन्मार्गगाभिनां देवानां अमृतं दत्वा दुर्मार्गगामिनः राक्षसान् मोहयामास। एवं क्लेशेषु शान्तिसुखार्थं आध्यात्मिकभावनया तीव्रप्रयत्नेन साधकेन इन्द्रियवासनाः दूरीकृत्य भगवद्भक्त्या लक्ष्यं साधनीयमिति समीचीनमुदेशमत्र पश्यामः।



अजल्पन्नहसन् वा भुञ्जीत।

# कुलशेखराल्वार् वैभवम्

- आचार्य जि.पद्मनाभम्, चरवाणी -९२४७३२८२८६

**घृष्यते यस्य नगरे रङ्गयात्रा दिने दिने।**
**तमहं शिरसा वन्दे राजानं कुलशेखरम्।।**

भारतदेशे श्रीरामानुजैः स्थिरीकृतं विशिष्टाद्वैतमतम्। इदं मतं संस्कृतवाङ्मये वैदिकशास्त्रग्रन्थवाङ्मये गोरवं प्रदर्शयत् नालायिर प्रबन्धमपि संयुज्य सम्यक् संवृद्धम्। विशिष्य ''नालायिरं'' उभयवेदान्तः इति समगौरवमत्र दृश्यते। इममेव द्राविडवेदः इति सम्भावयन्ति।

द्वादशाल्वारुमहाशयानां सङ्कलनमेव नालायिरम्। द्वादशाल्वारुमहोदयाः नैककाल, नैककुलनैकप्रदेशवासिनः। पेरियाल्वारु, विप्रनारायणः - मधुरकविः एते अग्रवर्णीयाः। कुलशेखराल्वरुमहोदयः क्षत्रियः केरलीयश्च अन्ये तमिलनाडुप्रान्तीयाः।

''कुम्भे पुनर्वसौ जातं, केरले कैलिपट्टणे। कौस्तुभांशं धराधीशं कुलशेखरमाश्रये।'' (मु - माला) एनं वैष्णवसमाजः कुलशेखरचक्रवर्ती कुलशेखरपेरुमाळ् इति व्यवहरति।

कुलशेखरवैशिष्ट्यम् - १. सुस्थिरशान्ति-सौभाग्यपालनं २. रामानुजानुरक्तिः ३. श्रीरङ्गनायकस्वामिभक्तिः ४.श्रीवेङ्कटेश्वरसेवानुरक्तिः ५. संस्कृततमिलभाषारचना वैशिष्ट्यम् इति षडंशाः अस्य वैशिष्ट्यं प्रदर्शयन्ति। अयं रामराज्यपरिपालनं प्रवर्तयन् विभीषणवत् सज्जनाश्रयः बभूव। अत एव विष्वक्सेनमहोदयः निर्हेतुककरुणतया कुलशेखरस्य पञ्चसंस्कारदीक्षां चकरोति गुरुपरम्परावचनम्।



**रामायणानुरक्तिः -** श्रीरामवदयं पुनर्वसुनक्षत्र सञ्जातः, वाल्मिकिकोकिलारावश्रवणासक्तः। अयं रामायणश्रवणेसर्वं विस्मरति स्म। उदाहरणवृत्तान्तः -: कदाचिदेकेन पौराणिकेन, भीमबलाः चतुर्दशसहस्त्रराक्षसाः खरदूषणादयः रथमारुह्य रामेण योद्धुमागच्छन्ति इति वर्ण्यमाने सति श्रीरामः कथमेकः दुरात्मना रावणेन योत्स्यति इति राजा कुलशेखरः स्वसैन्यं सन्नद्धं कर्तुमाज्ञां ददौ। तदा वैष्णवाः आगत्य ''श्रीरामः एकेन बाणेन चतुर्दश सहस्त्रराक्षसान् जघान। तदा सीता आनन्दातिरेकेण श्रीरामं परिषस्वजे इत्यवोचन्। तदा राजा कुलशेखरः मद्युद्धप्रयत्नः व्यःर्थ इति विरराम। कुलशेखरः कलियुगप्रारम्भे क्री-श-७६७ संवत्सरे जातः इति चारित्रकवचनम्। अस्य मुकुन्दपादारविन्दार्पित सुमनोमालां मुकुन्दमालां दैवभक्तियुताः स्वीयकण्ठमालामवश्यं कुर्वन्ति।

**कृष्णत्वदीयपद पङ्कजपञ्जरान्त -**
**मद्यैव मे विशतु मानसराजहंसः।**
**प्राणप्रयाणसमये कफवातपित्तैः**
**कण्ठावरोधनविधौ स्मरणं कुतस्ते।।**

चत्वारिशच्छलोकरत्नयुतोयं ग्रन्थः सर्वेरपि कण्ठस्थीकरणीयः।

**द्रविडदेशे जन्मवृत्तान्तः दृढवत -** नामकस्य प्रजारक्षणतत्परस्य राज्ञः श्रीहरिकटाक्षात् वंशतेजस्कत्वेन जातस्य पुत्रस्य कुलशेखरः इति नामकरणं कृतम् वेदवेदाङ्गेषु धनुर्विद्यायां एकसन्धाग्राहिणं षोडशकळापरिपूर्णं पुत्रं यौवराज्यभिषिक्तं कृत्वा दृढव्रतः स्वपालनाद्विश्रान्तिं स्वीचकार। कुलशेखरपालने धर्मदेवता चतुष्पादैः चलतिस्म। अजाव्याघ्राः निर्भयेन एकजलाशये जलं पिबन्तिस्म। अयं ब्राह्मणोत्तमेभ्यः गोसहस्त्रदानञ्चकार। अर्थकामदूरः भगवत्स्वरूपः भक्तिवैराग्य सम्पन्नोऽयं राज्यं वैष्णवभागवतोत्तमेभ्यः समर्प्य विष्णु भक्त्यैकप्रवणः आसीत्। श्रीवेङ्कटेश्वरे अपारभक्तिमानयं वेङ्कटाद्रौ अन्ततो गत्वा अहमेकः पर्वतसोपानं यदिस्यां श्रीवेङ्कटेशं पश्यन् सर्वस्वः तदानन्दतिरेके उन्मत्तः विस्मृत

भवेयं किलेति स्वामिमुखारविन्दसन्दर्शनं न जातमिति बाधां व्यक्तीचकार। श्रीरङ्गराजसेवार्थं श्रीरङ्गे एव नित्यनिवासं करिष्यमीति मत्वा श्रीरङ्गं प्रस्थितः। वैष्णवोत्तमदर्शनात् प्रयाणाद्विरक्तः। श्रीहरिसेवापेक्षया श्रीवैष्णवपूजैव अधिकमिति वैष्णवभक्तानेव नित्यं सेवतेऽस्म। ''पूजनाद्विष्णुभक्तानां पुरुषार्थोऽस्ति नेतरः। तेन तद्वेषतः किञ्चिन्नास्ति नाशनमान्मनः षष्ठिवर्षसहस्राणि विष्णोराशाधने, फलं सकृद्वैष्णवपूजायाः कलां नार्हति षोडशीम्। कुलशेखरः दिने दिने द्वयमन्त्रार्थप्रतिपादक श्रीमद्रामायण पठनश्रवणेनैव जीवितशेषः यापनीयः इति निश्चयश्चकार। परतत्त्वप्रकाशकरामायण रहस्यानि पौराणिकेभ्यः श्रृणोतिस्म।

**भक्तिपारवश्यम् -** कुलशेखरः भक्तिपारवश्ये अप्रतिमः। अपारश्रीरामभक्तोऽयं रावणेन सीतापहृतेति पौराणिकस्य पुत्रात् रामयणपुराणश्रुवणे श्रुत्वा दशकण्ठं हत्वा सीतामानयिष्यमीति स्वसैन्येन समुद्रं प्रतिवेश। सिद्धसाध्यगन्धर्वादयः अपि तद्दृश्यं अनिमेषतया पश्यन्ति स्म। प्रजाः दुःखाश्रुनिमग्नाः आसन्। तदा भक्तरक्षकः श्रीराम एव आगत्य सीतालक्ष्मणसहितः कुलशेखरभक्तिपारवश्यं ज्ञात्वा वत्स! कुलशेखर! अहमेव बन्धुमित्रसहितं रावणं हत्वा सीतामानयामीति दृश्यं श्रीरामचन्द्रमुखे दृष्ट्वा कुलशेखरः आनन्दबाष्पलोचनः बभूव। तदा द्विपदरामायण संग्रहे एव मुक्तवान् -

''दशरथनन्दन! ताटकजैत्र -
साकेतपुरनायक... जगदेकनायक''

तदा राजा समुद्र प्रवेशाद्विरम्य तीरमाजगाम।

तदैव श्रीरामः अदृश्यः बभूव। पश्चात् रामदर्शनं क्षण काले एव नष्टमिति शोकसागरनिमग्नः अहं महापापीति बाधामभिव्यक्तीचकार।

**चौर्यारोपणम् -** कदाचित् श्रीरामनवम्यां देवालयार्चकाः स्वाम्याभरणानि अभिषेकसमयात् पूर्वं अपनीयराज्ञः, भद्रं अन्येभ्यः अनुक्त्वा रहस्यस्थाने निक्षिप्तवन्तः। अभिषेकानन्तरं पुनः आभरणालङ्कृतं स्वामिनं कर्तुं अन्वेषणेकृते आभरणानि न दृष्टानि। तदा वैष्णवैरेव चोरितानीति मन्त्रिणः अवोचन्। तदा राजा भागवतोत्तमाः वैष्णवाः चौर्यं न कदापि करिष्यन्तीति चोरस्य तीव्रदण्डनं भविष्यतीत्यवोचत्। अहं भागवतवैष्णव दूषकान् प्रत्यक्षं पश्यमीति तत्फलतया अहमेव नरकमनुभविष्यामीति कालसर्पमानयित्वा हस्ते दधार। तदा मन्त्रिणः वैष्णवेषु चौर्यारोपनं मत्कृतमेवेति, भवन्तः नित्यवैष्णवपूजया राज्यपालनकर्तव्यविस्मृताः इति वैष्णव भक्तेः विरमयितुं अस्माभिः मन्त्रिभि एवं कृतमिति अस्मान् सर्वान् क्षमस्वेति राजानं प्रार्थयन्तः, पादाभिवन्दनं चक्रुः। तदा महाविरक्तः राजा अग्निपञ्जरेपि प्रवेशः युक्तः न विष्णुचिन्ता विमुखजनैः सहजीवनमिति मत्वा कुमारं दृढव्रतं राज्याभिषिक्तं कृत्वा श्रीरङ्गं गत्वा चिरकालभीष्टं सम्पूर्णमिति स्वसम्पत् श्रीरङ्गनाथस्वामिने समर्प्य धन्यो बभूव। श्रीरङ्गे बहुकालमुषित्वा दिव्यदेशान् सेवित्वा तदाराधनया वैष्णवतोषकरः सन् स्वकविताशीलसौन्दर्येण दक्षिणभारतभूमिं शोभान्वितं कृत्वा ६७ संवत्सरे परमपदमवाप। श्रीरङ्गनाथं, श्रीवेङ्कटेश्वरं, अन्यांश्च विष्णुदेवान् ''पेरुमळ् - तिरुमोळि'' इति शतपाशुरैः राजा द्राविडप्रबन्धे संस्तुल्य अजरामरकीर्तिकायः सम्पन्नः।

**१. विख्यातराजर्षिकुलेऽवतीर्य वितत्यभूमै भगवत्प्रभावं**
**विरञ्चिरुद्रादिसुरैरगम्यं विष्णोःपदं सम्यगवापधीरः।**
**२. नित्यं यत्रदनुमाद्भूततरं श्रोतृश्रवाणान्ददं**
**विख्यातं कुलशेखराख्यचरितं भक्ताब्जसूर्योदयं**
**पुण्यं पापविनाशनं भवहरं सम्पत्कारं सर्वदा**
**ये श्रृण्वन्ति पठन्ति सौम्यहृदयाः सम्पूर्णकामाहिताः।।**

भक्ताः एवं महाराजं भगवानिति कीर्तयन्तः। पेरुमाळनाम भगवान् कुलशेखरपेरुमालिति अस्य नाम अन्वर्थकम्। अयमेकस्मिन् पाशुरे एवममंस्त -

वस्त्राहारतृप्तलोकेन न मेऽस्तु सङ्गमः।

ब्रह्मादीन् संसृज्य पूतनास्तन्यं प्राणैरपि स्वीकृतमुखारविन्द श्रीकृष्णोन्मत्तोहमिति स्वयमेव प्रोवाच।

तिरुमल क्षेत्रे वेङ्कटेश्वरदेवालये कुलशेखरप्पडि इति मूलवर स्थामि द्वार समीपे प्रख्यातिरस्ति। एतैः कृत मुकुन्दमाला श्लोकाः -

**१. श्रीवल्लभेति वरदेति दयापरेति**
**भक्तप्रियेति भवलुण्ठनकोविदेति।**
**नाथेति नागशयनेति जगन्निवासेति**
**आलापिनं प्रतिपदं कुरु मे मुकुन्द।**
**२. जयतु जयतु देवो देवकीनन्दनोऽयं**
**जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः।**
**जयतु जयतु मेघश्यामलः कोमलाङ्गो**
**जयतु जयतु पृथ्वीभारनाशो मुकुन्दः।।**
**३. मुकुन्द मूर्घ्नाप्रणिपत्य याचे**
**भवन्तमेकान्तमियन्तमर्थं।**
**अविस्मृतिस्त्वच्चरणारविन्दे**
**भवे भवे मेऽस्तु भवत्प्रसादात्।।**

एवं मुकुन्दमालायं द्विपञ्चशत् श्लोकाः परमरपणीयाः गानयोग्याः भक्तिप्रेरकास्सन्ति।

मुकुन्दमालां पठन् नारायणं अशेषसौख्यं लभते कश्चित्। समस्तपापक्षयमेत्य देही प्रयातिविष्णोः परमं पदं तत्।।

# तिरुमलेशस्य सन्निधौ युगादि आस्थानम्



देवदेवः विष्णुः वैकुण्ठात् भूलोकमागच्छन् श्रीदेवीभूदेव्या सह गरुत्मन्तं अन्येसेवकपरिवारश्च आनयामासा। अतः स्वर्लोकवैकुण्ठसंस्थानं भूलोके तिरुपतिक्षेत्रं वैकुण्टसंस्थानमिव विराजते।

गोपीनाथदीक्षितः आन्ध्रार्चकस्वामी श्रीवेङ्कटेश्वरस्वामिनः, तिरुमलक्षेत्रे वैखनसागमशास्त्रमनुसृत्य अर्चनोत्सवादीन् निर्वहतिस्म। वैखानसदीक्षितवंशीयाः परम्परागताः अद्यापि तथैव अर्चनपूजाव्यहारान् अविच्छिन्नतया प्रवर्तयन्ति। आन्ध्रणां, कुलदैवस्य वेङ्कटेश्वरस्वामिनः संप्रदायनुसारं युगादिपर्वदिनात् सांवत्सरिकउत्सवाः प्रारब्धाः पुनः युगाद्यागमनपर्यन्तं (वर्ष पर्यन्तं) वैभवोपेत तया निर्वाह्यन्ते। तिरुमलक्षेत्रे युगादि वार्षिकोत्सवं युगादि-आस्थानमिति व्यवहरन्ति। अयं युगादिः स्वर्णद्वारपुरतः विद्यमानतिरुमहामणिमण्टपे वैभवोपेततया निर्वाह्यते

पश्चात् सम्प्रदायपदद्धत्या श्रीवेङ्कटेश्वरस्वामिनः अर्चकस्वामिनः, जिय्यंगार्लु, एकाङ्गिनः, वेदपण्डिताः, शिष्टाः देवस्थानान्याधिकारिणः, धर्मकर्तुमण्डलीसभ्याः सम्प्रदायपदद्धत्या तिरुमलालयोद्योगिनः -भागस्वामिनः भूत्वा आनन्दनिलयस्य वेङ्कटेश्वरस्य युगाद्यास्थानोत्सवदर्शनभाग्यं प्राप्नुवन्ति।

तदा अन्यभक्तानां प्रवेशः, दर्शनं, छायाचित्रस्वीकरणं न स्यात्। युगाद्यास्थानो-त्सवविधान पठनमननादेव अन्यभक्तेभ्यः मनोनेत्रदर्शनं भवेत्।

**एकान्ततिरुमञ्जनम्** - (अभिषेकः) युगादिदिने स्वामिनः आलये सुप्रभातम् - तोमालासेवानन्तरं उभयदेव्योः मलयप्पस्वामिनः सेनाधिपतेः विष्वकस्वामिनः एकान्ततया तिरुमञ्जनं (अभिषेकः) निर्वाह्यते। यदि युगादिः शुक्रवारे आगते सति स्वामिमूलमूर्तेः पूर्वमेव शुक्रवाराभिषेकः स्यात्, युगादिपर्व शुक्रवाराभिषेकानन्तरं स्वामिनः मूर्तिं विशेषवज्रविशिष्ट किरीटशङ्खचक्रवरद कटिहस्तकवचैरेलङ्कुर्वन्ति। एतस्मिन् विशेष।ालङ्करणे आनन्दनिलयमूर्तिसौन्दर्यं अनुपमानम्, अप्रमेयम्, अद्भुतानन्दसर्वार्थसिद्धिप्रदम्।

पश्चात् श्रीवेङ्कटेश्वरस्वामिनः तुलसीदलैः सहस्रनामार्चन निवेदनानि निर्वहिष्यन्ति।

सर्वभूपालवाहने स्वर्णद्वारपुरतः घण्टामण्टपे स्वर्णसर्वभूपालवाहने श्रीदेवी भूदेवीभ्यां मलयप्पस्वामिनं प्राङ्मुखं स्वर्णद्वारपुरतः गरुत्मतः अभिमुखं निवेशयन्ति।

पश्चात् पीताम्बरैः वज्रवैडूर्यमरकतमाणिक्यादि सर्वाभरणैः वज्रकिरीटेण सुगुन्धपरिमल भरितपुष्पमालाभिः उत्सवमूर्तिं नयनाभिरामं विशेषरीत्या अलङ्कुर्वन्ति।

श्रीपतेः सेनाधिपतिः -

सर्वभूपालवाहनपार्श्वे अन्यस्मिन् पीठे दक्षिणदिगभिमुखतया सेनाधिपतिं विष्वक्सेनं निवेश्य दिव्याभरणपुष्पमालाभिरलङ्कुर्वन्ति। शिरस्त्राणं खड्गं धृत्वा अत्यन्तं भयभक्तिभ्यां स्वामिनः आज्ञाप्रवर्तकत्वेन सिद्धं सर्वसन्नध्दमिव विष्वक्सेनं दर्शयन्ति।

पश्चादानन्दनिलये स्वामिनः मूलमूर्तेः, स्वर्णद्वारपुरतः युगादि आस्थानाय सिद्धः इव विद्यामानस्य श्रीपत्युत्सवमूर्तेः सेनाधिपतेश्च अधः उक्तरीत्या पिष्टपचनानि समर्पयिष्यन्ति।

विशेषपिष्टपचन निवेदनम् -

अर्चकस्वामिनः पेद्द, चिन्न, जिय्यगारुमहाशयाः विकलाङ्गिनः, आचार्यपुरुषाः वेदपण्डिताः, देवस्थान कार्यनिर्वाहकाः, देवस्थान धर्मकर्तुमण्डल्यध्यक्षाः, सभ्याः, आलय - पेष्कारमहोदयः, आलयस्थान्योद्योगिनः सर्वे, छत्रचामरमङ्गालवाद्यघोषैः श्रुतिषु भागवेदपठनैः पाचकाः संसिद्धविशिष्टपाचकानि पाचकशालायाः श्रीपतेः निवेदनाय, सोत्सवमानयन्ति।

मधुरलवंगापूपदोशादिपिष्टपाचकानि, शर्करा, पोङ्गलि... पुलिहोर - दध्योदनप्रसादान् विमानप्रदक्षिणे स्वर्णकूपपार्श्व स्थपाकशालायाः सोत्सवं विमानप्रदक्षिणं कुर्वन्तः रजतद्वारपुरतः रथबाह्यध्वजस्तम्भस्य प्रदक्षिणं कुर्वन्तः अन्तः आगत्य आलयप्रवेशं कृत्वा गर्भालय स्वर्ण द्वारसमीपस्थाने च निवेदनाय स्थापयन्ति। नैवेद्यघण्टासु हृदयङ्गमं वाद्यामानासु स्थलद्वये निवेदनं प्रवर्तयिष्यन्ति। निवेदनानन्तरं अन्यः वस्त्रसमर्पण घट्टः प्रारप्स्यते।

पीताम्बर समर्पणम् -

निवेदनानन्तरं विमानप्रदक्षिणे ईशान्यभागस्थयोगनरसिंहस्वाम्यालय पार्श्वस्थ ''परिमलार'' स्थानात् श्रीश्रीश्री पेद्दजिय्यगारु महोदयाः बृहद्रजतफलकपात्रे पुञ्जीकृतस्वर्ण, रेखायुत पीताम्बराणि शिरसिनिधाय छत्रचाममरमङ्गलवाद्यपुरस्सरं पुरतः पञ्चमुखदीपेषु प्रकाशमानेषु ढक्काघण्टासु, च वाद्यमानासु हृदयङ्गमं वेदपारायणं प्रवर्तयन्ति। तेषां सर्वेषां पश्चात् वामभागे श्रीश्रीश्री चिन्नजिय्यगारुमहाशयाः एकाङ्गिनः, देवस्थानकार्यनिर्वहणाधिकारी, संयुक्तकार्य निर्वहणाधिकारी पेष्कारहाशयाः, पारुपत्यदारु इत्याद्यालयाधिकारबृन्दः पश्चात् अगमिष्यन्ति। ततः आलयरजतद्वारपुरतःस्थ, स्वर्णध्वजस्म्भस्य बलिपीठस्य प्रदक्षिणं कुर्वन्तः अन्तः आगत्य विमानप्रदक्षिणं कुर्वन्तः स्वर्णद्वारपर्यन्तमागछन्ति। तत्र स्वर्णद्वारसमीपे मङ्गलवाद्यघोषान् श्रावयिष्यन्ति।

सन्निधिगोल्ल : - दीपैः पीताम्बरैः सहितान् जिय्यंगरुमहाशयान् अन्यांश्च महाशयान् श्रीपतिसन्निधिपर्यन्तमानीय कुलशेखरप्पडि समीपे स्थास्यति। श्रीजिय्यगारुमहाशयाः एकाङ्गिनश्च एव अर्चक स्वामिने सम्भावनां समर्पयिष्यन्ति। पश्चात् अर्चकस्वामिनः कुलशेखरप्पडिसमीपे (गर्भालयगडप) वस्त्राच्छादनं करिष्यन्ति। अन्तः अर्चकजिय्यगारुमहाशयैः समर्पितषट्पीताम्बरेषु चतुर्वस्त्रैः श्रीवेङ्कटेश्वर स्वामिमूलमूर्तिं अलङ्करिष्यन्ति। एकं वस्त्रं स्वामिकिरीटस्य, द्वितीयं नन्दकखड्गस्य तृतीयं आदितोमालामिव, चतुर्थं उत्तरीयमिव अलङ्करिष्यन्ति। पश्चात् अर्चकस्वामी आच्छदनवस्त्रमपनीय श्रीवेङ्कटेश्वरस्वामिदिव्य मङ्गलमूर्तेः स्वर्णपात्रे, पीतकर्पूरेण आपादमस्तकं दिव्य

मङ्गलकर्पूरनीराजनं समर्प्य तन्नीराजनं तत्रस्थसर्वेभ्यः दर्शयति। कुलशेखरप्पडि समीपस्थाः भक्ताः भक्त्या श्रीपतिं पश्यन्तः हारतिं स्वीकरिष्यन्ति।

**चन्दनतीर्थशठारिस्वीकारः -**

तदनन्तरं आदौ अर्चकाः चन्दनतीर्थशठारिस्वीकरणानन्तरं पंक्तौ, क्रमशः पेद्दजिय्यंगारुमहाशयाय चिन्नजिय्यंगारुमहाशयाय, एकाङ्गिने आचार्यपुरुषाय, ताळ्ळपाकवंशीयेभ्यः तीर्थशटारिचन्दनताम्बूलानि समर्पयन्ति। पश्चात् देवस्थानकार्यनिर्वहणाधिकारिणे तदितराधिकारिभ्यः तीर्थ चन्दनशठारिताम्बूलानि समर्पयन्ति।

**श्रीपतेः पीताम्बर समर्पणम् -**

पश्चात् द्विपीताम्बरसहितरजतपात्रञ्च पेद्दजिय्यगारुमहोदयाः शिरसि धृत्वा स्वर्णद्वारसमीपे युगादि आस्थानसंसिद्ध श्रीपत्युत्सवमूर्तिभ्यः समर्पयन्ति। अर्चकाः वस्त्रद्वये एकं श्रीमलयप्पस्वामिने द्वितीयं सेनाधिपतिविष्वक् स्वामिने अलङ्कुर्वन्ति।

**श्रीपतेः अक्षतारोपणम् -**

पश्चात् प्रधानार्चकाः स्वशिरसि श्रीपतिपादवस्त्रेण परिवेष्टनं कृत्वा मलयप्पस्वामिशिरसि, विष्वक्सेन शिरसि कुङ्कुमाक्षताः विकिरन्ति। पश्चात् सेनाधिपतये परिवेष्टनं कृत्वा स्वामिपादाक्षताः स्वीकृत्य विष्कक्सेनशिरसि विकीर्य शटारिगौरवं समाचरन्ति। अचकेभ्यः तण्डुलदानम् - आनन्दनिलयाय

**आशीर्वचन कथनम् -**

श्रीवेङ्कटेश्वरस्वामी अर्चकेभ्यः तण्डुलदानं, ताम्बूलं सदशिणं ददाति। तण्डुलेन सह दक्षिणताम्बूल स्वीकारानन्तरं अर्चकस्वामी साक्षादानन्दनिलयं ''नित्यैश्वर्यो भव'' इति आशीः - प्रयुनक्ति। साक्षात् श्रीनिवासात् दानं स्वीकुर्वन् तमेव श्रीनिवास! स्वामिन्निति सम्बुद्ध्य ऐश्वर्यपरम्परया वर्धस्व इति आशीःप्रदानार्चकभग्यं महाविशेषोपेतम्। एवमाशीर्वचन प्रदात्रर्चकेभ्यः परिवेष्टनं बद्ध्वा शठारिगौरवं प्रापयन्ति।

**पञ्चाङ्गश्रवणम् -**

पश्चात् स्वर्णवर्णशोभित सर्वभूपालवाहनस्थ श्रीदेवीभूदेवीसहित मलयप्पस्वामिपादस्थ नूतनसंवत्सरपञ्चाङ्गं अर्चकाः स्वामिने नमस्कृत्य अस्थानसिद्धान्तिने समर्पयन्ति। आस्थानसिद्धान्ती श्रीपतेः तत्कालीन तिथिवारनक्षत्रैः नूतनसंवत्सरफलितानि लाभनष्टे, नवग्रहसञ्चारं सस्यवृद्धिं, पशुवृद्धिं अन्यैश्च विषयै सह सप्तविंशति-नक्षत्रजातक, कन्दायफलानि, आदायव्ययराज्यपूज्यतावमानानि पञ्चाङ्गश्रवणं श्रावयति।

पुनः स्वामिनमुद्दिश्य स्वामिन् अखलाण्डकोटि ब्रह्माण्डनायक! आदिमध्यान्तरहित! जगदेक सार्वभौम! श्रीमद्राजाधिराज, परमेश्वर! नित्यकल्याणचक्रवर्तिन्। श्रीमदलमेल्मङ्गपते! श्रीमदानन्दनिलयवास! बहुपराक् बहुपराक् स्वामिन्। भवन्तः वैकुण्ठं परित्यज्य भूलोकवैकुण्टप्रवेशनक्षत्रं श्रवणानक्षत्रमतीव शुभप्रदम्। अस्मिन् नूतन संवत्तसरे भवन्तः दयान्तरङ्गाः भवपापार्तिं परिहृत्य अभीष्टार्थकामसिद्धिं दास्यन्ति। सर्वसम्पन्नगृहशुभ परम्पराः दास्यन्ति। अत एव नूतन वर्षे लक्षाधिक भक्ताः भवद्दिव्यमङ्गलसौन्दर्यमूर्तिदर्शनार्थं सोत्साहं निरन्तरं निरन्तरायं तिरुमलक्षेत्रमागच्छन्ति। भवते उत्सवाः वैभवोपेततया निर्वाहयिष्यन्ति। बहुमतिधनं समर्पयन्ति। भवन्तः नवग्रहदेवताबधाः निवार्य रक्षन्ति। भारतदेशः सस्यश्यामलः भविष्यति। कालमनुसृत्य अतिवृष्ट्यनावृष्टिरोगभयादिषु सत्स्वपि भवदनुग्रहात् सर्वे भक्ताः सानन्दं सुखं कालं यापयिष्यन्ति।

इति सिद्धान्ती नूतनपञ्चाङ्गश्रवणं कारयति। श्रीवेङ्कटेशः सर्वभूपालवाहने पञ्चाङ्गं श्रृवन् श्रीदेवीभूदेवीसहितः चिन्मयहासेन आमोदमुखं दर्शयन् भक्ताननुग्रहिष्यति।

पश्चात् सिद्धन्ती श्रीदेवीभूदेव्योः उत्तरफल्गुणीरेवतीनक्षत्रफलितान्युक्त्वा पश्चात् तत्रस्थ कार्यनिर्वहणाधिकारि, संयुक्तकार्य निर्वहणाधिकारि धर्मकर्तुमण्डलीसभ्यानां नक्षत्रफलं श्रावयिष्यति।

एवं पञ्चाङ्गश्रवणकारयिते आस्थानसिद्धान्तिने स्वाम्यर्चकाः स्वामिपादाक्षताः शिरसि, विकीर्य शठरिमनुग्रहिष्यन्ति। पश्चात् श्रीपतेः धनागाररक्षकोद्योगी उत्थाय अत्यन्तभयभक्तिभ्यां स्वामिने साष्टाङ्गनमस्कारं कृत्वा पूर्वदिनहुण्डी आदायव्यय, उत्सवविशेषान् देवस्थानालयोत्सवविशेषान् श्रावयित्वा ''स्वामिनः अनुमोदन्तु'' इति साष्टाङ्ग नमस्कारं कृत्वा ततः शटार्यनुग्रहं प्राप्नोति। पश्चात् ''कोलुवुपल्लेमिति'' स्वर्णपात्रे नवनीतहारतिं स्वामिने समर्प्य, ततः अर्चकाः तमेव हारतिं कार्यनिर्वहणाधिकारिणे दर्शयित्वा ततः अन्येभ्योऽपि दर्शयन्ति।

पश्चात् ताळळपाक - तरिगोण्ड-महन्तु मैसूरुदेवालयहारतयः प्रत्येकं समर्प्यन्ते। पश्चात्तत्रस्थ भक्तेभ्यः एकैकं रूप्यकं स्वीकृत्य सर्वपक्षतः रूप्यकहारतिं ददाति। ततः आगतरूप्यकाणि कार्यनिर्वहणाधिकारिधनागारे मिश्रीकुर्वन्ति। पश्चात् पेद्दजिय्यगारुमहाशयस्य देवस्थान -कार्यनिर्वहणाधिकारिणः शिरोवेष्ठन कृत्वा शठारिमनुगृह्य पश्चात् श्रीपतिप्रसादविनियोगं, अक्षतताम्बूलसत्कारं सम्प्रदायानुसारं निर्वर्तयन्ति। एतावता तिरुमलेशस्य युगाद्यास्थानोत्सवः परिसमाप्यते। युगादिपर्वदिने पञ्चाङ्गश्रवणात् शत्रुनाश दुस्स्वप्ननाशेनसह गङ्गास्नानगोदानफलप्राप्त्या सह अयुर्वृद्धिसत्सन्तनप्राप्तयः भवेयुः लोककल्याणार्थं तिरुमलेशकृतयुगादिपञ्चाङ्ग श्रवणमिदम्।

श्रीवेङ्कटेश्वरतिरुमलालये युगादि पर्वदिने उदये स्वर्णद्वारपुरतः एकान्ततया प्रवर्तमानस्य युगाद्यास्थानदर्शनसंतृप्त्यर्थं श्रीनिवासं स्मरन्तु। सर्वगृहाणि आनन्दनिलयाः, स्वर्णद्वाराणि, घण्टामण्टपाः एव सर्वहृदयाः एव सर्वभूपाल वाहनानि। हृदये श्रीनिवासं प्रतिष्ठापयन्तु। सर्वे नूतनवर्षे पञ्चाङ्गं श्रृण्वन्तु श्रीनिवासप्रभुदयया सर्वश्रेयांसि सम्पूर्णतया प्राप्नुवन्तु।

ललिता-रागः -

ताळ्ळपाकान्नमाचार्य सङ्कीतना : -

१. सकलबलम्बुलु नीवे सर्वेश्वरनाकु
अकलङ्कम्बगुसुखमे अन्निटनिदेनाकु (पल्लवि)
२. पोन्दुगचक्राङ्कितमे भुजबलमिदे नाकु
अन्दिनहरि नीचिन्ते आत्मबलं नाकु
सन्दडि पेरुबल केशवनाममु नाकु
यिन्दुनुनन्दुनु भवभयमिक लेदिदे नाकु (सकल)
३. अङ्गपुतिरुमणुलिवि पञ्चाङ्गबलमुनाकु
सङ्ग नीपै पाटले स्वरबल मीदे नाकु
रङ्गुग नीगुणरासुले रासिबलमु नाकु
यिङ्गितमुगनिहपरमुलके दुरे दिदे नाकु
४. कनु गोनु नी विग्रहमे ग्रहबलमिदे नाकु
विनु नी दासुल सेव वेनुबलमिदे नाकु
तनरिन श्री वेङ्कटपति दैवबलमु नाकु
घनमे चेप्पग निन्तट कलिगेबो यिदे नाकु (सकल)
श्रीनिवासो विजयते! श्रीनिवासो विजयते।
श्रीवेङ्कटाचलाधीशं श्रियाध्यासित वक्षसं।
श्रितचेतसमन्दारं श्रीनिवासमहंभजे।।

तेलुगुमूलम् - श्री जूलकण्टि बालसुब्रह्मण्यम्
संस्कृतानुवादः - डा. एम्.इश्वरम्मा

श्री न च रघुनाथाचार्यप्रणीता

# श्रीशेषाद्रीशस्तुतिः

## सुवर्णसौरभव्याख्या समेता

## पादभक्तिः मुक्तिनिश्रेणिका

(तदनन्तरम्)

व्याख्याता - डा. कन्दाल लक्ष्मीनारायणः
चरवाणी - ९९८५२३७३५३

श्लो.२०.

**अहमतिभयकारि संसारवार्धेरमुष्मात् द्रुतम्**
**वृषगिरिपतिपाद सद्भक्तिसौवर्णनिश्श्रेणिकाम्।**
**दृढतरमवलम्ब्य धैर्येण, गन्ता, तदूर्ध्वं पदम्**
**विलसति तमसःपरस्तात् यदानन्दसन्धायकम्।।**

**ता** - अहम् अतिभयङ्करे अस्मिन् सागररूपे संसारे वर्तमानोऽस्मि। तथापि शेषाद्रिनाथस्य वेङ्कटपतेः पादयोः भक्तिरूपां स्वर्णमयीम् आरोहण सोपान पङ्क्तिम् अधिष्ठितवान् अस्मि। तामेव संसार सागरात् उद्गन्तुम् उपायतया दृढम् अवलम्बितवान्। एताम् अवलम्ब्य एव निर्भयः निर्भरश्च अहम् तमोमयात् एतस्मात् सागरात् उपरि विद्यमानम् आनन्दपरिपूर्णं भगवत्सन्निधानं परमंपदं गमिष्यामि।।

सु.सौ.व्याख्या- पूर्वस्मिन् श्लोके भगवच्चरणारविन्दयोः शरणागतिः अभिवर्णिता, तया जनः जन्मान्ते निरन्तरानन्द निलयं परमपदम् अवश्यं प्राप्नोति इति शरणागतेः अनुत्तमं फलं विव्रियते अस्मिन् श्लोके।

अतिभय... वार्धेः - संसाररूपः सागरः अत्यन्तं भयजनकः। समुद्रे, तस्मिन् आशा एव अपरिमितं जलम्। तत्र मन्मथाख्येन तीव्रपवनेन उद्धूताः मोहरूपाः तरङ्गपङ्क्तयः। किञ्च भार्यादिरूपा भ्रमिः परिभ्रमयति। तनूज अनुजरूपाः ग्राहसमूहाः जिघत्सन्ति च। एवम् एते सर्वेऽपि भवसागरे मग्नं जनं नित्यं पीडयन्ति। अतः अयं संसारः अर्णव इव अतिघोरः।

तस्मिन् पतितस्य तस्मात् उद्गन्तुं हरिभक्तिः एका एव नौकारूपेण साधनभूता भवति। तदुक्तं पुराणेषु -





अङ्गारः शतधैतेन मलिनत्वं न मुञ्चति।

**एवमेकाग्रचित्तस्सन् संस्मरन् मधुसूदनम्।**
**जन्ममृत्यु जराग्राहं संसाराब्धिं तरिष्यति।।**

- यो जनः नियतमानसः चितं हिरस्मरणे लग्नं कृत्वा भक्त्या तम् उपासते, स एव जननमरण वार्धकरूपैः जलजन्तुभिः व्याप्तं भयङ्करं संसारवारिधिम् अतिक्रामति इति।

वृषगिरि... निश्श्रोणिकाम् - श्रीशेषाचलपतेः पादेषु निष्ठिता भक्तिरेव सुवर्णमयनिश्श्रेणिका। निश्श्रेणिकानाम ऊर्ध्वदेशगमनाय उपयुज्यमाना तत्साधनभूता सोपानपङ्क्तिः। ताम् आलम्ब्य एव संसार जलधेः शीघ्रम् उत्तरिष्यामि इत्यर्थः। यद्यपि समुद्रसदृशात् संसारात् उद्गन्तु कर्मज्ञानादयः अनेके उपायाः शास्त्रेषु बोधिताः। तथापिहरिचरणभक्तिः एका एव त्वरितगत्या संसारात् उद्गन्तुं शक्यते इति भावः। अतः तामेव भक्तिम् अनन्यमनसा साधनतया परिगृह्य ऊर्ध्वं परमपदं गमिष्यामि इति उच्यते।

दृढतरम् - हरिसान्निध्यप्राप्तये भक्तिरेव गरीयसी उपायः इति बुद्ध्या विश्वासपूर्वकं तामेव उपायतया स्वीकुर्यात् इति भावः। इदमेव उक्तवान् भगवान् स्वयम्-

**भक्त्यात्वनन्यया शक्य अहमेवंविधोऽर्जुन!।**
**ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप!।। भ.गी।।**

- हे पार्थ! अनन्यविषयया केवलमद्विषयया भक्त्या एव अहम् जीवेन प्राप्तुं शक्यः। वस्तुतः मत्स्वरूपं ज्ञातुं मांसाक्षात्कर्तुम्, मत्सन्निधिं प्रवेष्टुं च केवलमद्विषयकभक्तिरेव उपायभूता। नत्वन्यः श्रेष्ठः उपायः अस्ति।

तथैव उक्तं च अभियुक्तैः -

''मोक्षमाधन सामग्र्यां भक्तिरेव गरीयसी'' इति।

- मोक्षरूपफलसाधने इतरसाधनापेक्षया भक्तिः एका एव उत्कृष्टतमः उपायः इति भावः।

ऊर्ध्वं पदं तमसः परस्तात् - भक्त्या एव तमोमयात् प्रकृतिमण्डलात् बहिः ऊर्ध्वाया दिशि विराजमानं तत् स्थानं प्राप्तुं शक्यते। तत् च पदं'' तद्विष्णोः परमं पदम्'' इति श्रुतिभिः बहुशः प्रतिपादितं शुद्धसत्त्वमयं श्रीवैकुण्ठाख्यम्। तत् स्थानं ''अथैतेरेव रश्मिबिः ऊर्ध्वमाक्रमते'' छा. ८.६.५ इत्यादि वेदान्तवचनेषु ऊर्ध्वलोकतया निर्दिष्टम्। तदेव आदित्यवर्णं तमसः परस्तात् - पु.सू.इत्यादि श्रुतिषु तमोमयात् प्रकृति मण्डलात् बहिः विद्यमानमिति निर्दिष्टम्।।

आनन्द सन्धायकं पदम् - शुद्धसत्त्वमयत्वेन आनन्दनिलयं तत् स्थानम्। तत् च'' ज्ञानानन्दमयालोकाः इति आगमशास्त्रे वर्णितम्। रसो वै सः, रसंह्येवायं लब्ध्वाऽऽनन्दी भवति'' - तै. आ.इति तैत्तिरीयवचनानुसारेण परमपदम् आनन्दस्वरूपस्य आनन्दप्रदस्य परमात्मनः नित्यनिवासत्वात् भक्तेभ्यः आनन्ददायकं च भवति इति ज्ञायते।।

श्लोकोऽयं महामालिका नामके विलक्षणवृत्ते निबद्धः। तल्लक्षणम् इदम् - यदिहनयुगलं ततो वेदरेफैः महामालिका'' इति। दिं च वृत्तं पण्डितैः नाराचवृत्तम् सिंहविक्रीडितवृत्तम्, निशावृत्तम् इति नामान्तरैः व्यवह्रियते।

(अनुवर्तिष्यते)


## SAPTHAGIRI

### STATEMENT ABOUT OWNERSHIP AND OTHER PARTICULARS ABOUT

(MONTHLY)
FORM IV
See Rule 8

| | | |
|---|---|---|
| 1. Place of Publication | : | TIRUPATI |
| 2. Periodicity of its Publication | : | Monthly |
| 3. Printer's Name | : | Sri P. Ramaraju, M.A. |
| Whether citizen of India | : | Yes |
| Address | : | S.O.,T.T.D.Press K.T.Road, Tirupati: 517510. |
| 4. Publisher's Name | : | Dr. K. Radha Ramana, M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga |
| Whether citizen of India | : | Yes |
| Address | : | Chief Editor Office, T.T.D.Press Building, 2nd Floor,K.T.Road, Tirupati. |
| 5. Editor's Name | : | Dr. V.G.Chokkalingam, M.A., Ph.D. |
| Whether citizen of India | : | Yes |
| Address | : | Chief Editor Office, T.T.D.Press Building, 2nd Floor, K.T.Road, Tirupati. |
| 6. Name and address of individuals who own the News paper and partners or share holders holding more than one percent of the Total Capital | } | Tirumala Tirupati Devasthanams |

*I, K. Radha Ramana, hereby declare that the particulars given above are true to the best of my knowledge and belief.*

TIRUPATI
Date : 28-2-2025

(Sd.) Dr. K. Radha Ramana
*Signature of the Publisher*




अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।



# मत्स्यजयन्ति

- डा.के.कोटेश्वरय्य

चरवाणी - ९९८५१२३२६२

अस्मिन् क्रोधिनामसंवत्सरे चैत्रमासे ३१ दिने सोमवासरे मत्स्यजयन्ति उत्सवः निर्वहणीयः इति ज्योतिष्कैः निर्णीतः।

परित्राणाय साधूनां विनाशायचदुष्कृतां।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।

इति गीतावचनमनुसृत्य दुष्टशिक्षणाय भगवान् विष्णुः प्रधानदशावतारेषु अदिमं मत्स्यवतारं स्वीचकार। वेदमन्त्रेपि भगवान् विष्णुरुपत्वेन वर्णितः। भागवतपुराणमनुसृत्य जले स्वल्पाकारः बृहत्प्राणिभ्यः मत्स्यः आत्मरक्षणं ययाचेति, वर्णितम्। अग्निपुराणमनुसृत्य देवालयेषु जले, वा उत्तरदिशि मत्स्यविग्रहः स्थापनीयः। विष्णु धर्मोत्तरपुराणं सस्यफलाभि वृध्यर्थं मत्स्यपूजा आचरणीयेति निर्दिशति। मत्स्यः विष्णुस्वरुपेण पूज्यः इति ब्रह्माण्डपुराणे प्रोक्तम्। गरुडपुराणे स्कान्दपुराणस्थ विष्णुसहस्रनामस्तोत्रेषु मत्स्यप्रस्तावना दृश्यते।

चैत्रमासे दिने रात्रौ मत्स्यजयन्तिः मत्स्यजत्येत्सवाः निर्वहणीयाः इति निर्दिष्टम्। विष्णुभक्ता मत्स्यजयन्ति - पूर्वदिनादेव उपवासव्रतमाचरन्तः मत्स्यरूपं विष्णुं सायं समये संपूज्य उपवासाद्विरमन्ति। विष्णुदेवालयेषु विशिष्य मत्स्यजयन्तिदिने प्रत्येकपूजां निर्वहन्ति। तत्रस्थाः मत्स्यशखीयाः मीनेशात् विष्णोः स्ववंशः आरब्धः इति वदन्ति। मत्स्यजयन्तिमेव मीनेशजयन्तिपर्वदिनमिति वदन्ति वराहपुराणे पद्मपुराणस्थमार्गशीर्षमाहात्म्ये मत्स्यजन्मव्रतपूजायां उपवास -नियमेन स्वर्णमत्स्यपूजा मार्गशिरमासे द्वादशदिनेषु आचरणीयेति निर्दिष्टम्। भारतदेशे मत्स्यदेवालयाः अधिकतया न सन्ति द्वारकायां शंखोदरदेवालयः आन्ध्रदेशे नागलापुरे वेदनारायणदेवालयः, बेंगुलूरुनागरे मत्स्यनारायणदेवालयाः, सुप्रसिद्धाः। आन्ध्रदेशे वेदनारायणस्वामिदेवालयः तिरुपति समीपे ४५ मैलूदूरे सत्यवीडुमण्डले मद्रासूतिरूपतिमार्गमध्ये वर्तते। अत्र, मत्स्यावतारे भगवान् श्रीदेवीभूदेवी सहितः पूज्यते। अत्र विजयनगरवास्तुशिल्पं देवालये द्योत्यते। अत्र कलियुगावतरणात् पूर्वं प्रळयेन प्रपञ्चे जलमये जाते ब्रह्मणः निद्रावस्थायां हयग्रीवेण वा सोमकासुरेण वेदाः अपहृताः। तदा ज्ञातविषयः विष्णुः मत्स्यरूपं धृत्वा राक्षसं हत्वा वेदान् ब्रह्मणे समर्पयासेति ऐतिह्यं शिल्परूपे दृश्यते।

तिरुमल तिरुपति देवस्थानं इमं देवालयं २९ एप्रेल् १९६७ वर्षे स्वाधीनं कृत्वा महासौन्दर्योपेततया अनुबन्धनिर्माणानि कृत्वा अनादिपूजोत्सवान् पुनरुद्धृत्य भक्ताकर्षकं करोति। श्रीकृष्णदेवरायः स्वप्नदृष्ट विष्णुप्रोक्तरीत्या देवालयमिमं निर्ममे। उत्सवसमये सूर्यकिरणानि गर्भालये प्रविश्य प्रथमदिने स्वामिपादयोः द्वितीयदिने नाभौ तृतीयदिने मुखे पतन्ति। शिल्पिभिरेवं निर्माणमत्यद्भुतम्। वर्षे वर्षे तत्र सूर्यसेवा अतिपवित्रतया देवालये प्रवर्तते।

ब्रह्मपुराणे मत्स्यमाधवः राज्ञा श्वेतमाधवेन श्वेतगाङ्गा समीपस्थपूरीनगरे श्वेतमाधवदेवालये पूजितः इति वर्णितम्। नेपाल्देशे "मच्चेगोन्" स्थाने मत्स्यविष्णु जयन्तिः - वार्षिकोत्सवः निर्वाह्यते। श्रीलङ्कस्थमत्स्यदेवालयः अद्य

अकले दुर्लभोमृत्युः स्त्रीणां वा पुरुषस्य वा।

विनष्टः ति वदन्ति। केरलराष्ट्रे त्रयः मत्स्यदेवालया नित्यापूजानिर्वाहकतया सौभाग्यतया विरजन्ते। मत्स्यमधिकृत्य प्रथमवृत्तान्तः शतपथ ब्राह्मणे दृश्यते। वेदयुगमत्स्यरक्षकः आदौ ब्रह्मा इव पश्चात् विष्णुरिव परिगणितः। पुराणेषु मत्स्याविर्भावकथा वर्णिता। मनुरक्षणेन स्वल्पमत्स्यः महामत्स्यत्वेन परिणतः। पश्चात् मानवजातेः मूलपुरुषत्वेन परिणमय्य वेदचोरकहयग्रीवराक्षसमवधीदिति वर्णितम्।

मत्स्यावतार कथा - श्रीमन्नारायणः प्रलयान्धकारे क्षीरसागरे वटपत्रशायी सन् योगनिद्रायामासीत्। तदा तस्य हस्तशङ्खः समुद्रे पपात। किञ्चित्कालानन्तरं शङ्खमुखात् कश्चिद्राक्षसः प्रादुर्बभूव। शङ्खदागमनात् तस्य शङ्खासुरः इति नाम आगतम्। सः महाकायः जले परिभ्रमन् क्षुदूबाधापीडितः महाध्वनिञ्चकार। वेदपठननिमग्नः ब्रह्मा तच्छब्दं श्रुत्वा तत्समीपं जगाम सः राक्षसः तं अत्तुं प्रायततदा ब्रह्मा भीतः धावतिस्म। तदा ब्रह्मोरुस्थाः वेदाः जले पतिताः। तदा शङ्खासुरः तान् वेदान् मुखात् स्वोदरगताञ्चकार। तदा हठात् सृष्ट्याधारभूत वेदकोशाभावात् दुःखितः पितरं विष्णुं प्राप्य स्वावस्थां विशदीचकार। वेदराशिना विना सृष्टिकार्यं कथं करिष्यामीति प्रोवाच। तदा विष्णुः पुत्रं सात्त्वयित्वा राक्षसं हत्वा वेदकोशमानेष्यामीत्यवोचत्। ततः श्रीमन्नारायणः मत्स्यावतारं धृत्वा गदाचक्रधारी सन् समुद्रे प्रविश्य अन्विषन् सप्तदिनावधौ शङ्खासुरसमीपं जगाम। तदा स्वोपरि पतन्तं राक्षसं चक्रं प्रयुज्य तस्य शिरः चिच्छेद। ततः उरः विदीर्य तदुरथं शङ्खं वेदराशिञ्च स्वीचकार। ततः शङ्खं स्वसकशे निनेश्य वेदराशिं ब्रह्मणे पुनः समर्प्य वेदोक्तप्रकारं सृष्टिकार्यं विधेहीत्याज्ञां दत्वा स्वनिलयं वैकुण्ठञ्जगाम। ततः ब्रह्मा सर्वप्राणिसृष्टिकार्यं चकार। वेदव्यासरचिताष्टादशपुराणेषु मत्स्यपुरणमादिमम्। नारदमहर्षिणा इन्द्रद्युन्मिमहाराजाय इदं पुराणं प्रोक्तमिति व्यासमहर्षिणा निर्दिष्टम्। अस्मिन् पुराणे चतुर्दशसहस्रश्लोकाः वर्तन्ते। ''मात्स्यं मेदः प्रकीर्त्यते'' महाविष्णोः मेदः एव मत्स्यपुराणम्।

अत्र मत्स्यावतरवर्णनम्, ब्रह्माण्डसृष्टिः, गर्भिणी धर्माः सूर्यचन्द्रवर्णनम्, गया क्षेत्र वर्णनं, पुरुरवचरितम्, कचदेवयान्योः वृत्तान्तः, कार्तवीर्यार्जुनचरितम्, श्यमन्तकोपाख्यानम् शुक्राचार्यकृतशिवस्तुतिः, कलिधर्माः, कृष्णष्टमी व्रतम्। अक्षयतृतीयाव्रतम्, कल्याणसप्तमी, विशोक, सप्तमीफल, सप्तमीव्रतानि, महादानप्रशंसा, पुष्पवाहनकथा, प्रयागयमुनाक्षेत्रमाहात्म्यम्, सप्तद्वीप, त्रिपुरासुरदेवासुर संग्राम वृत्तान्ताः, युगधर्माः ऋषिलक्षणानि, तारकासुर वृत्तान्ताः युगधर्माः ऋषिलक्षणानि, तारकासुरवृत्तान्तः पार्वतीकल्याण, विनायकविजय, कुमारसम्भव, नृसिंहावतार विष्णुलीलाकाशी क्षेत्रमाहत्म्यवृत्तान्ताः सावित्रीसत्यवचरितम् राजधर्म सामदानभेददण्डोपायाः राजनीति सम्बन्धिनः सदसत्फलितानि, वामनवरहावतार, क्षीरसागरमथन, वास्तुशास्त्रक्रियायोग, प्रतिमालक्षणादिविषयाःवर्णिताः। अत्र मानवोपयोगिनः केचित् प्रधानश्लोकाः -

लब्ध्वा जन्म न यः, कश्चिद्दूषयेत्पौरुषं नरः।
जन्म तस्य वृथा भूतयोनिजन्मातु विशिष्यते।।
देवोयदिपिता जातः शुभकर्मानुसारतः।
तस्यान्नममृतं भूत्वा दिव्यत्वेप्यनुगच्छति।।



सर्वेभ्यः
'सप्तगिरि'
पाठकेभ्यः कर्तुभ्यः,
कविभ्यः
श्रीविश्वावसुसंवत्सर
युगादि शुभाकङ्क्षाः।
- प्रधानसम्पादकः





# बलवतोऽपिगर्व विनश्यति (हनुमद्गर्वभङ्गः)

- डा सि.रामलक्ष्मी
चरवाणी - ९८८५४६३३७१

श्रीरामः समुद्रसेतुनिर्माणे निर्विघ्नपरिसमाप्त्यर्थं नलद्वारा विनायक नवग्रहशिलाप्रतिमाः प्रतिष्ठापयामास। आत्मनम्नापि, शिवलिङ्गं प्रतिष्ठितुं एतदर्थं हनुमन्तमाहूय मुहूर्तकाले काशीविश्वेश्वरं प्राप्य तदनुग्रहात् शिवलिङ्गमेकं मुहूर्तकाले एव अनेतव्यमिति कालातिक्रमः मरिस्त्वति आज्ञापयामास। तदा हनुमान् शतयोजनतिस्तीर्णं समुद्रमेवोल्लध्य लङ्कास्थ सीतावार्ता अनीता मया। एतछिवलिङ्गनयनं कियन्ममेति गर्विष्ठः एतत्कार्यं मुहूर्तकाले कर्तव्यमिति ममैव, रामः कथयति, किमहं समयपालनं न जानामीति काशीं गत्वा महेश्वरं प्रणनाम।तदा महेश्वरः आञ्जनेयमुद्दिश्य वायुपुत्र। बहोः कालादहं दक्षिणकाशीं जिगमिषुरस्मि। अगस्त्यः विन्ध्यपर्वतगर्वमपनेतुं काशीं परित्यज्य गतः। मद्वियोगवाधापीडितोऽस्ति। अहं तत्र गत्वा मम दर्शनभाग्यं दास्यामीति त्वं एतछिवलिङ्गद्वयं स्वीकृत्य रामसकाशं गत्वा एकं रामनाम्ना, अन्यत् मन्नाम्ना। प्रतिष्ठापय इत्यवोचत्। हनुमान् अवलीलया एतत्कार्यमहं करिष्यमीति स्वसामर्थ्यबले आत्मानन्दं प्राप्य गर्वमनस्कः बभूव। श्रीरामः आञ्जनेयस्य मानसिकगर्वं दिव्यदृष्ट्या ज्ञात्वा तद्गर्वमपनेतुमैछत्। झटिति आञ्जनेयाय, दत्तः मूहूर्तकालः अतिक्रामतीति सुग्रीवमाहूय हनुमादागमनवार्ता न ज्ञायते। मुहूर्तसमयः अत्येतीति सैकतशिवलिङ्गमहं प्रतिष्ठापयमीति मुनिजनानुमत्या सैकतशिवलिङ्गं प्रतिष्ठापयामास। पश्चात् दानदक्षिणार्थं कौस्तुभमणिं सस्मार। झटिति कौस्तुभमणिः आकशे सूर्यवदाजगाम। श्रीरामः तन्मणिं कण्ठमालाश्चकार। तत्प्रभावात् धनवस्त्राभरणाश्वधेन्वादयः उद्भूताः। रामः तैः मुनीन् सत्कृत्य स्ववासं प्रेषयामास। मार्गमध्ये सानन्दान् मुनिवरान् दृष्ट्वा हनुमान् भवन्तः कस्मात्सम्मानिताः इत्यपृच्छत्। महर्षयस्ते श्रीरामः महावैभवोपेततया शिवलिङ्गप्रतिष्ठाश्चकार। दानदक्षिणाभिः सन्तुष्टाः वयं प्रतिनिवृत्ताः इति समादधुः। एतच्छ्रुत्वा राममायासंकल्पात् क्रुद्धः हनुमान् ‘‘श्रीरामः मां वृथाश्रमपीडितश्चकारेति मन्वानः झटिति रामं समीप्य नमस्कृत्य लङ्कास्थ सीताविषयवार्तानीतफलसत्करोऽयं वा? काशीशिवलिङ्गमानयेति किमर्थं मां अपहास्यावमानिनं अकरोः। अहं व्यर्थश्रमोऽभवमिति प्रपच्छ।

तदा करुणासमुद्रः रामः त्वदुक्तं सत्यमेवेति गतं गतमिति सैकितशिवलिङ्गमपनीय त्वदानीतं शिवलिङ्गं प्रतिष्ठापय इति प्रशान्तमनस्कः अवोचत्।

तदा संप्रीतः हनुमान् रामप्रतिष्ठितशिवलिङ्गापनयनाय स्ववालं, परिवृतं कृत्वा, यावछक्ति आचकर्ष। किञ्चिदपि शिवलिङ्ग न चचाल। वालभङ्गेन मूछितः हनुमान् अन्यवानरै परिहसितः। ततः मोहमूर्च्छाजागृतः गर्वभङ्गः मम सञ्जातः इति रामपादयोः पतित्वा क्षमां ययाचे। शरणागतवत्सलः रामः पश्चात्तप्ताञ्जनेयं क्षमित्वा स्वप्रतिष्ठित शिवलिङ्गोत्तरभागे विश्वनाथलिङ्गनाम्ना हनुमादानीतलिङ्गद्वयं प्रतिष्ठाप्य हनुमत्प्रतिष्ठितशिवलिङ्गद्वयपूजया विना मत्प्रतिष्टापितशिवलिङ्गपूजाकृता चेत् निष्फलं भविष्यतीति, हनुमते वरं दत्वा हनुमन्तमुद्दिश्य वालभङ्गरूपस्थितावेव अदृष्टपादरुपेविग्रहं सस्थापय, निगर्वोवसिष्यसीत्यवोयत्। तथैव आञ्जनेयः स्वगर्वराहित्यप्रकाशकमुखाकारशिलाविग्रहं निर्ममे। अद्यापि तादृशहनुमद्विग्रहः तत्र दृश्यते। एवं हनुमद्गर्वः श्रीरामेण अपनीतः।

श्रीरामचन्द्रः श्रितपारिजातः समस्तकल्याण गुणाभिरामः।
सीतामुखाम्भोरुहचञ्चरीको निरन्तरं मङ्गलमातनोतु।।

# “अलमेल्मङ्गाश्रीनिवासौ भक्तपराधीनौ”

## पश्यन्तु... पश्यन्तु... स एव हरिवासः सएव हरिवासः

### दशसहस्त्रफणामण्डलमयः

तेलुगु मूलम् - डा.श्रीनिवासदीक्षितुलु
चित्राणि - श्री के. द्वारकानाथः
संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०






अकीर्तिरिव नरको नान्योऽस्ति नरको दिवि।


15 बहुसमये अतीतेऽपि वास्तवमार्गः न दृश्यते। सः बह्वायासयुतः आसीत्। नयन भ्रमः अपि आसीत्।
16 तदा अन्नमाचार्यः मातरं अलमेलुमङ्गाम्बां स्वामिनं श्रीनिवासश्च वास्तवमार्गं करुणया दर्शयन्तु इति प्रार्थयामास।
17 तदा वृद्धमाङ्गल्यवती अलमेल्मङ्गाम्बारूपेण साक्षात्कृता।
18 तां दृष्ट्वा जननि! मम मार्गं दर्शय मातः त्वमेव ममशरण्यम्। करुणामृतवल्लि!
19 वृद्धा माङ्गल्यवती अलमेल्मङ्गाम्बा बालं सम्बुद्ध्य
20 पुत्र! पादरक्षाभ्यां पर्वतारोहणं दोषः किल। अयं पर्वतः पवित्र सालग्रामशिला खलु।
21 माता अलमेल्मङ्गाम्बा अदृश्या बभूव! पुरतः भक्ताः, श्रीपत्त्यानन्दनिलयश्च दृष्टः। झटिति अन्नमाचार्यमुखात् संकीर्तनमागतम् .....
22 पर्वत स्थितं स्वामिनं दृष्ट्वा, अन्नमाचार्यः, ''स एव हरिवासः, स एव हरिवासः''।
23 त्वरया अन्नमाचार्यपर्वतारोहणकार्यं समाप्तम्। सः पुष्करिण्यां सस्नौ। देवालयं गत्वा वेङ्कटेश्वरस्वामिनं ददर्श।
24 अन्नमाचार्यमनः पारवश्यतां गतम्। आनन्दनिर्भरं जातम्। आनन्दबाष्पैः....
25 सप्तगिरिवास! पुष्करिणीनाथ!
26 ओं नमो वेङ्कटेशाय
27 भक्ताह्वानेन माता देवी प्रतिसमाधानं दास्यति इति ज्ञायते।



प्रदत्तं चित्रपटम् बिन्दुसाहाय्येन पूरयामः वा?

अस्य चित्रपटस्य रञ्जनं कुर्मः वा?

बा
ल
वि
नो
दि
नी









अ. लक्ष्मीजयन्ति
आ. होली
इ. युगादि



समीचीन समाधान सङ्ख्यां कोशे लिखन्तु।





मार्गं अण्विषन्तु

श्रीकृष्णेन प्रसार्यमाणयन्त्रजलं उल्लङ्घयितुं केन मार्गेण गोपिका गन्तव्या।









उपरि प्रदर्शितानि वस्तूनि कस्य पर्वणः सम्बन्धीनि

समाधानानि : - युगादि



अकिञ्चनोऽपि सन्तुष्टः शेते सर्वाङ्गविज्वरः।

Printed by Sri P. Ramaraju, M.A., and Published by Dr. K. Radha Ramana, M.A., M.Phil., Ph.D., P.G.Dip.in Epigraphy, Dip. in Yoga ,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507. Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.



19.01.2025 तिथौ तिरुमलतिरुपतिदेवस्थानाध्वर्ये अयोध्याश्रीरामाय धर्मकर्तुमण्डल्यध्यक्षाः श्री बि.आर्.नायुडु महोदयाः धर्मपत्न्यासह पीताम्बराणां समर्पणदृश्यम्। अस्मिन् कार्यक्रमे ति.ति.दे.धर्मकर्तुमण्डली सभ्याः श्री जि.भानुप्रकाशरेड्डिमहोदयाः हिन्दूधर्म प्रचारपरिषत्कार्यदर्शी श्री श्रीराम् रघुनाथ महोदयाः आलयप्रधानार्चकाः वेणुगोपालदीक्षिताः अन्ये अधिकारणिश्च भागं गृहीतवन्तः।




15.01.2025 तिथौ तिरुपतिस्थ ति.ति.देवस्थानपरिपालनभवनप्राङ्गे प्राग्भागास्थविशालभूभागे सर्वप्रेक्षकप्रदर्शकतया प्रवर्तित श्रीगोदादेवीकल्याणमहोत्सवमनोहरदृश्यम्।



19.01.2025 तिथौ तिरुपतिस्थस्विम्स् आरोग्यालयविभागान् अकस्मात्पर्यवेक्षणकार्यनिमग्नाः ति.ति.देवस्थानकार्यनाधिकारी श्री जे.श्यामलारावु ऐ.ए.यस्., महोदयाः, अपि च संयुक्तकार्य - निर्वहणाधिकारी श्री वीरब्रह्मं महोदयाश्च। एतत्सम्बन्धि दृश्यम्।



27.01.2025 तिथौ तिरुचानूरु पद्मावतीदेव्यालयपरिसरेषु पर्यवेक्षणं कृत्वा पट्टणनिर्माणसूचकाधिकारिभ्यः, भक्तेभ्यः समुचितसौकार्यार्थं मास्टरुप्लान् सिद्धं कर्तुं युक्तसूचनाप्रदाता ति.ति.देवस्थानकार्यनिर्वहणाधिकारी श्री जे.श्यामलारावु ऐ.ए.यस्., महोदयाः, संयुक्तकार्यनिर्वहणाधिकारी श्री वि.वीरब्रह्मं ऐ.ए.यस्., महोदयाः अपिच एतदनुसृत्यागत ति.ति.दे., प्रधानप्रजासम्बन्धविषयाधिकारी श्री टि.रवि, अन्याधिकारिणश्च। एतेषां सर्वेषां उपस्थितिदृश्यम्।



26.01.2025 तिथौ तिरुपतिस्थ ति.ति.देवस्थान भवनप्राङ्गणे सुविशालप्रदेशे प्रवर्तित गणतन्त्रदिनोत्सवकार्ये ति.ति.दे. पर्यवेक्षण भद्रताविभागकवातौगौरववन्दनं स्वीकुर्वन्तः ति.ति.देवस्थान कार्यनिर्वहणाधिकारिणः श्री जे.श्यामला रावु ऐ.ए.यस्., महोदयाः। एतत्सम्बन्धि दृश्यम्।



02.02.2025 तिथौ ति.ति.देवस्थान धर्मकर्तुमण्डल्याः एक्स्-अफिसियो सभ्यत्वेन प्रमाणस्वीकारं कुर्वद्भ्यः देवादायशाखासम्बन्धी कमीषनर् श्री के. रामचन्द्रमोहन् महोदयेभ्यः प्रसादवितरणं कुर्वन्तः ति.ति. देवस्थानानुबन्धकार्यनिर्वहणाधिकारिणः श्री सि.हेच्. वेङ्कय्यचौदरि, ऐ.ए.यस्., महोदयाः। एतयोः मनोहर दृश्यम्।

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-02-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 5th of every month.



श्रीलक्ष्मीजयन्ति
14.03.2025